# दारवचनम्

एकस्मिन् ग्रामे  कश्चन तन्तुवायः आसीत् । सः प्रतिदिनं वस्त्रं वयति स्म । कदाचित् तस्य नयनयन्त्रस्य काष्ठनिर्मितः दण्डः भग्नः । नूतनदण्डम् आनेतुं सः परशुं गृहीत्वा वनं गतवान् । तत्र सः एकम् उत्तमं वृक्षम् दृष्टवान् । सः वृक्षच्छिन्दनं आरब्धवान् ।

तस्मिन् वृक्षे एका देवता वसति स्म । सा काष्टकृन्तकं उक्तवती – 'भोः, एषः वृक्षः मम वासस्थानम् अस्ति । अतः भवान् एतं मा कर्तयतु । अहं भवते एकं वरं ददामि । भवान् यद् इच्छति तद् याचतु' इति ।

अहं चिन्तयित्वा वदामि इति उक्तवान् सः। अनन्तरं मित्रस्य नापितस्य गृहं गतवान् । तं पृष्टवान् – 'भोः मित्र देवता वरं दातुं सज्जा अस्ति । किं वरं याचानि' इति।

नापितः उक्तवान् – 'भवान् राज्यं याचतु । तेन महाराजत्वं प्राप्यते । अहं भवतः मन्त्री भविष्यामि' इति ।

अस्तु इति उक्त्वा सः गृहम् आगतवान् । पत्नीं पृष्टवान् – 'प्रिये देवता वरं ददाति । नापितः वदति - राज्यं याचतु इति । किं वरं याचानि' ।

सा उक्तवती – 'नापितः मूर्खः । सः किमपि न जानाति । राज्यस्य निर्वहणे बहु कष्टं भवति । अतः राज्यं मास्तु । इदानीं भवान् प्रितिदिनम् एकं वस्त्रं वयति किल । तेन अस्माकं देनन्दिनजीवनार्थम् अपेक्षितं धनं एव लभ्यते । भवान् देवताम् अन्यत् बाहुद्वयं द्वितीयं शिरः च याचतु । तदा भवान् प्रतिदिनं वस्त्रद्वयं कर्तुं शक्नोति । एकस्य वस्त्रस्य धनं दैनन्दिनोपयोगार्थम् भवति । द्वितीयस्य धनं सङ्ग्रहितुं शक्यते । तदा वयं सुखेन जीवितुं शक्नुयाम' इति ।

सः एतत् अङ्गीकृतवान् । सः वनं गत्वा देवतां याचितवान् । 'भगवति, मह्यम् अन्यत् बाहुद्वयं, द्वितीयं शिरः च ददातु' इति ।

देवता तथास्तु इति उक्तवती । तत्क्षणमेव मन्थरकस्य अन्यत् बाहुद्वयं, द्वितीयं शिरः च उत्पन्नम् । सः सन्तोषेण ग्रामम् आगतवान् । परन्तु जनाः विचित्राकारं तं दृष्ट्वा एषः राक्षसः इति मत्वा दण्डेन ताडयित्वा तं मारितवन्तः ।

*   *   *